# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा, एप्रिल-२०१६

**कक्षा - शास्त्री-३ ( Sem_6 )** **प्रश्नपत्र-५** **गुणा: - ७०**

**विषय: - पौरोहित्यम्** (Old_Syllabus) **समय: - ११:०० त: ०२:००**

**दिनाङ्क: - २२-०४-२०१६** **सन्दर्भग्रन्थ: - याज्ञिकन्यायमाला**

---

### युनिट-१

**प्रश्न: -१ निम्नाङ्कितेषु कयोश्चित् द्वयो: ससन्दर्भं व्याख्या विधेया ।** ०८

*(१) याज्ञिकं जन्म सोमीयं किं वान्यदिति चिन्त्यताम् ।*
*वेदैस्त्रिभि: कृतो यज्ञ इति दीक्षैव याज्ञिकम् ॥*

*(२) तन्त्रदीक्षावतामेवाधिकारो जपकर्मणि ।*
*सर्वस्य वेति तन्त्रोक्ते दीक्षितस्याधिकारिता ॥*

*(३) दीक्षावद् दीर्घसत्रं च सूत्रश्रुत्यनुमोदनात् ।*
*गणोपनयनं सिद्धयेत् सत्रशब्दप्रयोगत: ॥*

**प्रश्न: -२ वसोर्द्धारादेवतानां स्वतन्त्राधिकरणं यथाशास्त्रं वर्णयत ।** ०८

*अथवा*

**तान्त्रिकमन्त्रेषु प्रणवायोजनाधिकरणं याज्ञिकन्यायमालादृष्ट्या विवेचयत ।**

**प्रश्न: -३ कयोश्चिद् द्वयो: टिप्पणी कार्या ।** ०४

*(१) वात्सल्यनाम । (२) यज्ञोपवीतपरिधानाधिकरणम् । (३) वैणवदण्ड: ।*

**प्रश्न: -४ अधस्तनेषु पञ्चप्रश्ना: एकवाक्येन समाधेया: ।** ०५

*(१) स्नातकदण्डस्य प्रमाणे क: नियम: ?*

*(२) क्षत्रियस्य कृते दण्डप्रमाण: क: ?*

*(३) चतुर्थाध्यायस्य पेटिकाया: नाम किमस्ति ?*

*(४) 'समावर्तनसंस्कारेऽलङ्कारे कुण्डलं भवेत्' इति कस्य वचनम् ?*

*(५) जातस्य पुत्रस्य नामकरणं क: करोति ?*

*(६) वसोर्द्धारादेवताश्च सम्पूज्य किमाचरेत् ?*

*(७) राजसूययागे कस्याधिकार: ?*

### युनिट-२

**प्रश्न: -५ अधोलिखितेषु कयोश्चिद् द्वयो: व्याख्या कार्या ।** ०८

*(१) एवं स्थितिप्रशंसाया: कामना: कर्तृनाम च ।*
*पठनीया: स्तोत्रपाठे नैषां स्वार्थे समर्थता ।*

*(२) उपचारेषु ताम्बूलं साधितं वास्त्यसाधितम् ।*
*साधितं भोग्यतापन्नं देयं देवाय नेतरत् ।*

(३) *अन्नानि पत्रपुष्पादि फलान्नेषु प्रगृह्यताम् ।*

*तेन वैणवनीवारबकुलासूपसंग्रहः ॥*

**प्रश्नः -६ कस्यचिदेकस्य समीक्षाा विधेया ।** ०८

(१) *यान्त्रिकगीतनृत्यवादित्रादीनामुपचारासाधकताधिकरणम् ।*

(२) *आवाहनपूजनादिषु लौकिकशब्दप्रयोगाधिकरणम् ।*

**प्रश्नः -७ टिप्पणीं लिखत ।( एकस्य )** ०२

(१) *पूर्वपक्षः ।* (२) *फलश्रुतिः ।*

**प्रश्नः -८ द्वयोः लघूत्तरं लिखत ।** ०२

(१) *मन्त्रस्य लक्षणं किमस्ति ?*

(२) *वादस्य कति भेदाः ?*

(३) *'शकुने साम गायसि' इति ऋग्वेदस्य वचनानुसारं कः सामगानं करोति ?*

(४) *'एष हि हव्यवाहनः' इति वचने हव्यवाहकः कः ?*

**युनिट-३**

**प्रश्नः -९ अधोलिखितेषु कयोश्चिद् द्वयोः व्याख्या कार्या ।** ०८

(१) *गयाश्राद्धोत्तरं श्राद्धं पिण्डं ब्राह्मणभोजनम् ।*

*न कर्तव्यं विधेयं वा माहात्म्येऽकरणीयता ।*

(२) *अथापि दशगात्रस्य कर्म, पोषणकारकम् ।*

*जीवस्य योनिदेहे स्यात्तस्मात्तत्सप्रयोजनम् ॥*

(३) *अचेतने देवतात्वात् प्रत्यक्षानुपलब्धितः ।*

*मन्त्रात्मिका विधिप्रोक्ता देवता नैव युज्यते ॥*

**प्रश्नः -१० याज्ञिकन्यायमालायाः फलपेटिकायाः विषयवस्तु प्रस्तूयताम् ।** ०८

**अथवा**

**श्राद्धस्य दृष्टादृष्टत्वव्यवस्थापनाधिकरणं विशदयत ।**

**प्रश्नः -११ कयोश्चिद् द्वयोः टिप्पणीं लिखत ।** ०४

(१) *याज्ञिकेषु देवताविग्रहाधिकरणम् ।* (२) *गयाश्राद्धः ।* (३) *वैदिककर्म ।*

**प्रश्नः -१२ अधस्तनेषु पञ्चप्रश्नाः एकवाक्येन समाधेयाः ।** ०५

(१) *'यस्यै देवतायै हविर्गृहितं स्यात् तां ध्यायेद् वषट् करिष्यन्'-इति वचनं कुत्र श्रूयते ?*

(२) *'वषट्' कारस्य प्रयोगः कुत्र विधीयते ?*

(३) *दण्डग्रहणमात्रेण नरः किं भवति ?*

(४) *अचेतनादि ओषध्यदिषु का देवता विद्यते ?*

(५) *यागस्य लक्षणं किम् ?*

(६) *दर्शपूर्णमासाभ्यां फलं किं श्रूयते ?*

(७) *पूर्वमीमांसादर्शनानुसारं धर्मस्य लक्षणं किम् ?*

-------------------